# आदर्श-प्रश्न-पत्रम्-2019-20

## कक्षा : दशमी

## संस्कृतम् (122)

## मॉडल पेपर-1

**समयः- होरात्रयम्** **सम्पूर्णांकाः-80**

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

**खण्ड : क : अपठित-अवबोधनम्** **10 अंकाः**

**खण्ड : ख : रचनात्मककार्यम्** **15 अंकाः**

**खण्ड : ग : अनुप्रयुक्तव्याकरणम्** **25 अंकाः**

**खण्ड : घ : पठित-अवबोधनम्** **30 अंकाः**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(v) प्रश्नानाम् निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः - क 10 अंकाः

## अपठित-अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 10**

भारतद्वारं प्रसिद्धं स्मारकं वर्तते। वीराणां बलिदानस्य पुण्यस्मृतिस्थलम् इदम्। अस्मिन् द्वारे वीराणां नामानि उत्कीर्णानि सन्ति। इदम् ऐतिहासिकं स्थलं दृष्ट्वा जनाः नतमस्तकाः भवन्ति।

भारतद्वारं परितः हरिताः वृक्षाः शोभन्ते। देश-विदेशेभ्यः आगताः जनाः भारतद्वारं द्रष्टुम् आगच्छन्ति। एतत् द्वारं सर्वान् आकर्षयति। विस्तृताः स्वच्छाः मार्गाः हरिताः वृक्षाः अस्य शोभां वर्धन्ते। भारतद्वारस्य पार्श्वे 'बोटक्लब' इति पर्यटनस्थलम् अस्ति। अवकाशदिवसे तु जनाः परिवारेण सह अत्र आगच्छन्ति। अत्रागत्य सहभोजनं कुर्वन्ति।

रात्रौ विद्युद्दीपकानां प्रकाशैः प्रकाशितं भारतद्वारम् दूरात् एव सुशोभते। गणतन्त्रदिवसे स्वतन्त्रतादिवसे च जनाः अत्रागत्य दिवङ्गतसैनिकान् स्मरन्ति तेभ्यः श्रद्धाञ्जलिं च यच्छन्ति। भारतद्वारं भारतस्य गौरवम् अस्ति।

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$
   (i) भारतद्वारं परितः के शोभन्ते?
   (ii) भारतस्य गौरवं किम्?
   (iii) अवकाश दिवसे जनाः केन सह अत्र आगच्छन्ति?
2. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$
   (i) भारतद्वारस्य शोभां के वर्धयन्ति?
   (ii) कैः प्रकाशितं भारतद्वारं दूरादेव शोभते?
   (iii) केषाम् बलिदानस्य पुण्यस्मृतिस्थलम् इदम्?
3. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1
4. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'स्मरन्ति' इति क्रियापदस्य कर्तृपदं किम्?
      (क) वीराः
      (ख) जनाः
      (ग) पर्यटकाः
   (ii) 'प्रकाशितम्' इति पदं कस्य विशेषणपदम् अस्ति?
      (क) स्मारकस्य
      (ख) बलिदानस्य

(ग) भारतद्वारस्य

(iii) 'निशायाम्' इत्यर्थे अत्र किं पदं प्रयुक्तम्?

(क) प्रकाशे

(ख) दिवसे

(ग) रात्रौ

(iv) अनुच्छेदे 'गत्वा' पदस्य कः विपर्ययः आगतः?

(क) आगत्य

(ख) हरिताः

(ग) अस्य

**उत्तरम् :**

1. (i) हरितवृक्षाः
   (ii) भारतद्वारम्
   (iii) परिवारेण
2. (i) विस्तृताः स्वच्छाः मार्गाः, हरिताः वृक्षाः भारतद्वारस्य शोभां वर्धन्ते।
   (ii) रात्रौ विद्युद्दीपकानां प्रकाशैः प्रकाशितं भारतद्वारं दूरादेव शोभते।
   (iii) वीराणाम् बलिदानस्य पुण्यस्मृतिस्थलम् इदम्।
3. **शीर्षक–** भारतद्वारम्/भारतस्य गौरवम्/ऐतिहासिकस्थलम्।
4. (i) (ख) जनाः
   (ii) (ग) भारतद्वारस्य
   (iii) (ग) रात्रौ
   (iv) (क) आगत्य

## खण्डः – ख 15 अंकाः

## रचनात्मककार्यम्

**2. भवान् विशालः प्रयागे पठन्ति। स्व–अध्ययनस्य प्रगति विषये ज्येष्ठं भ्रातरं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पत्रं पुनः लिखत।** $1/2 \times 10 = 5$

परीक्षाभवनम्

(1) ..........

तिथिः ..........

पूज्य भ्रातः

(2) ..........। अत्र सर्व कुशलम्। तत्रापि कुशलं (3) .......... अधुना (4) .......... शिक्षणं नियमेन आरब्धम्। अहं प्रतिदिनम् प्रातः (5) .......... उत्तिष्ठामि। ततः (6) .......... पठितानांपाठानाम् आवृतिं करोमि। संस्कृतविषये मया प्रथमं स्थानं (7) ..........। गणितविषये मम दुर्बलता अधुना (8) ..........।

पितृभ्याम् मम (9) ..........।

भवताम् अनुजः

(10) ..........

| मञ्जूषा |
|---|
| सादरं नमः, पञ्चवादने, प्रणामाः, प्रयागतः, मम, कामये, दूरीभूता, सप्तवादनपर्यन्तम्, विशालः, प्राप्तम् |

**उत्तरम् :**

परीक्षाभवनम्

(1) **प्रयागतः**

तिथिः ..........

पूज्य भ्रातः

(2) **सादरं नमः**। अत्र सर्व कुशलम्। तत्रापि कुशलं (3) **कामये** अधुना (4) **मम** शिक्षणं नियमेन आरब्धम्। अहं प्रतिदिनम् प्रातः (5) **पञ्चवादने** उत्तिष्ठामि। ततः (6) **सप्तवादनपर्यन्तम्** पठितानांपाठानाम् आवृतिं करोमि। संस्कृतविषये मया प्रथमं स्थानं (7) **प्राप्तम्**। गणितविषये मम दुर्बलता अधुना (8) **दूरीभूता**।

पितृभ्याम् मम (9) **प्रणामाः**।

भवताम् अनुजः

(10) **विशालः**

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** $1 \times 5 = 5$



| |
|---|
| **मञ्जूषा–**वनस्य, शृगालः, सिंहशावकाः, गजः, भयभीताः, दयालुः, मेघाः, पक्षिणः, शिलायाः, पार्श्व, भ्रातरा, मारयितुम्, वृक्षाः |

**उत्तरम् :**

1. एतत् वनस्य दृश्यम् अस्ति।
2. शिलायां पार्श्वे भ्रातरा अस्ति।
3. गजः, शृगालः सिंहशावकाः च तस्मात् भयभीताः।
4. आकाशे मेघाः सन्ति।
5. पक्षिणः आकाशे उत्पतन्ति।

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–** $1 \times 5 = 5$

"**समाजसेवा**"

| |
|---|
| **मञ्जूषा**–जीवने, करणीया, दीनाय धनम्, निश्शुल्कं, पाठनम्, आनन्दम्, जनानां सहायता, विद्याम्, स्नेहम्, समयम्, दुःखस्य मूलं स्वार्थः, सुखस्य मूलं त्यागः, सफलतायाः, रहस्यम्, आत्मशान्तिः। |

**उत्तरम् :**

**समाजसेवा**

जीवने समाजस्य सेवा करणीया। दीनाय् धनम् दातव्यम्। निश्शुल्कं पाठनम् करणीयम्। जनानां सहायता करणीया। अनेन आनन्दं प्राप्नोति। आत्मशान्तिः सफलतायाः रहस्यम्। यतो हि दुःखस्य मूलं स्वार्थः, सुखस्य मूलं च त्यागः।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्)** $1 \times 5 = 5$

1. कार्यक्रम कब शुरू होगा?
   When will the programme start?
2. क्या आपने वह खबर पढ़ी है?
   Have you read that news?
3. वीरता प्रसिद्धि का कारण है।
   Valour is the cause of fame.
4. एक हाथी बहुत धीरे-धीरे चलता है।
   An elephant walks too slowly.
5. साहस मनुष्य का सबसे बड़ा आभूषण है।
   Courage is the greatest ornament of a man.
6. अपने भाई का नाम बताओ।
   Tell your brother's name.
7. पक्षी पेड़ों की शाखाओं पर घोंसले का निर्माण करते हैं।
   The birds build the nests on the branches of trees.

**उत्तरम् :**

1. कार्यक्रमः कदा प्रारप्स्यते?/प्रारभेत?
2. अपि त्वं तां वार्ताम् अपठः?/अपि सा वार्ता त्वया पठिता?
3. पराक्रमः कीर्तिकारणम्।
4. गजः शनैः शनैः/मन्दं मन्दं चलति।
5. धैर्यं मनुजस्य/मानवस्य परमभूषणम्।
6. तव भ्रातुः नाम कथय।/निवेदय ते भ्रातुः नाम।
7. खगाः/विहगाः वृक्षशाखासु नीडानि रचयन्ति।

**खण्डः ग** **25 अंकाः**

## अनुप्रयुक्तव्याकरणम्

**5. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. नृपः रिपुं + जयति।
   **उत्तरम् :** रिपुञ्जयति
2. खगाः आकाशे स्वच्छन्दं विचरन्ति।
   **उत्तरम् :** स्व + छन्दम्
3. नृपः + अपि वनम् अगच्छत्।
   **उत्तरम् :** नृपोऽपि
4. मूर्खेण पुत्रेण कोऽर्थः?
   **उत्तरम् :** कः + अर्थः
5. वृद्धः निः + बलः अस्ति।
   **उत्तरम् :** निर्बलः

**6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. राजगृहे मेषयूथम् आसीत्।
   (क) राज्ञा गृहे
   (ख) राज्ञे गृहे
   (ग) राज्ञः गृहे
   **उत्तरम् :** (ग) राज्ञः गृहे
2. वर्षं वर्षं प्रति दीपावलिः भवति।
   (क) प्रतिवर्षम्
   (ख) प्रतिवर्ष
   (ग) अप्रतिवर्षम्
   **उत्तरम् :** (क) प्रतिवर्षम्
3. सीता च रामः च वनम् अगच्छताम्।
   (क) सीतारामौ
   (ख) सीता रामश्च
   (ग) सीता रामाः
   **उत्तरम् :** (क) सीतारामौ
4. दश आननानि यस्य सः लंकायाः राजा आसीत्।
   (क) दशानमः
   (ख) दशाननः
   (ग) दशानाय
   **उत्तरम् :** (ख) दशाननः
5. आदरेण सहितम् त्वां नमामि।
   (क) सादरम्
   (ख) सादरः
   (ग) सादरमः
   **उत्तरम् :** (क) सादरम्

**7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. वीराः अभ्युदये क्षमा+मतुप् भवन्ति।
   (क) क्षमावान्

(ख) क्षमावानाः

(ग) क्षमावन्तः

**उत्तरम् :** (ग) क्षमावन्तः

2. तत् श्रुत्वा परद्रव्ये अनासक्ता सा न्यवेदयत्।

(क) अनासक्त + आ

(ख) अनासक्त् + आ

(ग) अनासक्त + टाप्

**उत्तरम् :** (ग) अनासक्त + टाप्

3. वाचि सदा मृदु + तल् भवेत्।

(क) मृदता

(ख) मृदुता

(ग) मृदुतल्

**उत्तरम् :** (ख) मृदुता

4. तपस्विन्+ङीप् गीतं गायति।

(क) तपस्वी

(ख) तपस्वि

(ग) तपस्विनी।

**उत्तरम् :** (ग) तपस्विनी।

5. श्रृगालस्य कातरत्वं सर्वे जानन्ति।

(क) कात + रत्वं

(ख) कातर + तल्

(ग) कातर + त्व

**उत्तरम् :** (ग) कातर + त्व

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत–** $1 \times 3 = 3$

**अरूणः**–रमे! किं त्वं प्रातः पञ्चवादने उत्तिष्ठसि?

**रमा–** आम्! मया प्रातः पञ्चवादने (1) ..........।

**अरूणः–** किं त्वम् वाटिकां सिञ्चसि?

**रमा–** आम्! (2) .......... वाटिका सिच्यते।

**अरूणः–** किं सुधा विद्यालयं गच्छति?

**रमा–** आम्! सुधया (3) .......... गम्यते।

| मञ्जूषा |
|---|
| विद्यालयम्, उत्थीयते, मया। |

**उत्तरम् :**

(1) उत्थीयते, (2) मया, (3) विद्यालयम्।

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत (केवलं त्रयाणाम्)–**

1. वानराः वृक्षम् आरोहन्ति।
2. ताः नगरे भ्रमन्ति।
3. अहं वेदं पठामि।
4. शिष्याः गुरूं प्रणमन्ति।
5. सः आपणं गच्छति।

**उत्तरम् :**

1. वानरैः वृक्षः आरुह्यते।
2. ताभिः नगरे भ्रम्यन्ते।
3. मया वेदः पठ्यते।
4. शिष्यैः गुरूः प्रणम्यते।
5. तेन आपणं गम्यते।

**9. कालबोधकशब्दैः अधोलिखित– दिनचर्यां वा पूरयत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. छात्रः रामेश्वरः प्रातरेव (8:00) .......... वादने विद्यालयं गच्छति।
2. सः (9:30) .......... वादने जलपानं करोति।
3. तत्पश्चात् अपराह्ने (1:15) .......... वादने गृहम् आगच्छति।
4. पश्चात् रामेश्वरः (5:45) .......... वादने गृहम् क्रीडनाय गच्छति।
5. पश्चात् रामेश्वरः (6.30) .......... वादने मंदिरं गच्छति।

**उत्तरम् :**

1. अष्ट
2. सार्धनव
3. सपादएक
4. पादोन षड्
5. सार्ध षड्

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत– (केवलं प्रश्नषटकम्)** $1/2 \times 6 = 3$

1. वयं .......... विद्यालयं गच्छामः।
2. मेघाः ..........गर्जन्ति न च वर्षन्ति।
3. वने .......... पशुमहोत्सवः अस्ति।
4. प्रहरी .......... भ्रमति।
5. त्वम् इदानीम् .......... आगच्छसि?
6. त्वं ......... कुत्र गच्छसि?
7. ते सर्वे ......... नाटिकां द्रष्टुम् अगच्छन्।
8. रामः श्यामः .......... आपणं गच्छतः।

| मञ्जूषा |
|---|
| अद्य, अधुना, इतस्ततः, उच्चैः, साम्प्रतम्, कुतः, च, ह्यः |

**उत्तरम् :**

1. अधुना
2. उच्चैः
3. अद्य
4. इतस्ततः
5. कुतः

6. साम्प्रतम्
7. ह्यः
8. च

**11.अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नत्रयम्)**

$1 \times 3 = 3$

1. जनाः ह्यः आपणं गमिष्यन्ति। (अगच्छन्/अगच्छताम्/गच्छानि)
2. सः बालिका क्रीडति। (बाला/बालकः/बालकौ)
3. त्वं कदा नाटकं द्रक्ष्यन्ति? (द्रक्ष्यसि/पश्यन्ति/पश्यावः)
4. त्वम् मम् मित्रः असि। (मित्रौ/मित्रम्/मित्रा)

**उत्तरम् :**

1. अगच्छन्
2. बालकः
3. द्रक्ष्यसि
4. मित्रम्

## खण्डः – घ 30 अंकाः

## पठित-अवबोधनम्

**12.अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसतिस्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद- "कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) राजसिंहः कुत्र वसति स्म?
   (ii) राजसिंहस्य भार्या का आसीत्?
   (iii) बुद्धिमती गहनकानने कम् ददर्श?
2. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) राजसिंहस्य भार्या आवश्यककार्येण कुत्र चलिता?
   (ii) सा किं दृष्ट्वा पुत्रौ चपेटया प्रहृत्य जगाद?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) "राजसिंहः" इति पदस्य क्रियापदं गद्यांशे प्रयुक्तम्?
      (क) ददर्श
      (ख) चलिता
      (ग) वसति स्म
   (ii) "ददर्श" इति क्रियापदस्य कर्तृपदं किम्?
      (क) बुद्धिमती
      (ख) राजसिंहः
      (ग) ग्रामः
   (iii) "राजसिंहः" इति पदस्य किं विशेषण पदं गद्यांशे प्रयुक्तम्?
      (क) गहनम्
      (ख) राजपुत्रः
      (ग) एकम्
   (iv) "पत्नी" इत्यस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?
      (क) सिंहः
      (ख) भार्या
      (ग) काननम्

**उत्तरम् :**

1. (i) देउलाख्ये ग्रामे।
   (ii) बुद्धिमती।
   (iii) एकं व्याघ्रम्।
2. (i) राजसिंहस्य भार्या आवश्यककार्येण पितुर्गृहं प्रति चलिता।
   (ii) सा व्याघ्रमागच्छन्तं दृष्ट्वा पुत्रौ चपेटया प्रहृत्य जगाद।
3. (i) (ग) वसति स्म।
   (ii) (क) बुद्धिमती।
   (iii) (ख) राजपुत्रः।
   (iv) (ख) भार्या।

**13.अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5**

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।
शुचि-पर्यावरणम्।।
महानगरमध्ये चलदनिशं कालायसचक्रम्।
मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम्।।
दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्। शुचि...।।

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) अत्र किम् दुर्वहं जातम्?
   (ii) कस्य शरणं गन्तव्यम्?
   (iii) सदा वक्रं किं भ्रमति?
2. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) महानगरमध्ये अनिशं किं चलति?
   (ii) कैः जनग्रसनं नैव स्यात्?
3. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'कालायसचक्रम्' इति कर्तृपदस्य क्रियापदं किम्?
      (क) चलत्
      (ख) भ्रमति
      (ग) स्यात्
   (ii) 'शुचि-पर्यावरणम्'- इत्यत्र किं विशेष्यपदम्?
      (क) पर्यावरणम्
      (ख) शोषयत्

(ग) मनः

(iii) 'शरीरम्' इत्यस्य पदस्य कः पर्यायः पद्यांशे प्रयुक्तम्?

(क) महानगरम्

(ख) चक्रम्

(ग) तनुः

(iv) 'सरलम्' इत्यस्य पदस्य पद्यांशे विलोमपदं किं प्रयुक्तम्?

(क) शुचि

(ख) दुर्वहम्

(ग) जीवितम्

**उत्तरम् :**

1. (i) जीवितम्।
   (ii) प्रकृतिरेव।
   (iii) कालायसचक्रम्।
2. (i) महानगरमध्ये अनिशं कालायसचक्रं चलति।
   (ii) दुर्दान्तैर्दशनैरमुना जनग्रसनं नैव स्यात्।
3. (i) (ख) भ्रमति।
   (ii) (क) पर्यावरणम्।
   (iii) (ग) तनुः।
   (iv) (ख) दुर्वहम्।

**14. अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत- 5**

(सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ।)

विदूषकः- इत इत आर्यौ!

कुशलवौ- (रामस्य समीपम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य?

रामः- युष्मद्दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः।

(आसनार्धमुपवेशयति)

उभौ- राजासनं खल्वेतत्, न युक्तमध्यासितुम्।

रामः- सव्यवधानं न चारित्रलोपाय। तस्मादङ्क-व्यवहितमध्यास्यतां सिंहासनम्।

(अङ्कमुपवेशयति)

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) सिंहासनस्थः कः?
   (ii) विदूषकेन सह कौ प्रविशतः?
   (iii) कुशलवौ कस्य समीपं गच्छतः?
2. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) कुशलवौ किं कृत्वा रामस्य कुशलं पृच्छतः?
   (ii) सव्यवधानं कस्मै न भवति?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) "सिंहासनस्थः रामः" इत्यत्र विशेष्यं पदं किम्?
   (क) रामः
   (ख) सिंहासनस्थः
   (ग) कुशलम्
   (ii) "अध्यास्यताम्" क्रियायाः गद्यांशे कर्तृपदं किम्?
   (क) रामः
   (ख) तापसः
   (ग) कुशलवौ
   (iii) "दूरम्" इत्यस्य किं विलोमपदं नाट्यांशे प्रयुक्तम्?
   (क) कुशलम्
   (ख) समीपम्
   (ग) स्पर्शः
   (iv) "कुशलवौ" इति कर्तृपदस्य क्रियापदं किम्?
   (क) आर्यो
   (ख) तापसौ
   (ग) प्रविशतः

**उत्तरम् :**

1. (i) रामः।
   (ii) कुशलवौ।
   (iii) रामस्य।
2. (i) कुशलवौ रामस्य समीपम् उपसृत्य प्रणम्य च कुशलं पृच्छतः।
   (ii) सव्यवधानं चारित्रलोपाय न भवति।
3. (i) (क) रामः
   (ii) (ग) कुशलवौ
   (iii) (ख) समीपम्
   (iv) (ग) प्रविशतः

**15. रेखांकित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत- (केवलं प्रश्नचतुष्ट्यम्) $1 \times 4 = 4$**

1. शकटीयानम् कज्जलमलिनं धूमं मुञ्चति।
2. उद्यानें पक्षिणां कलरवं चेतः प्रसादयति।
3. पाषाणीसभ्यतायां लतातरूगुल्माः प्रस्तरतले पिष्टाः सन्ति।
4. महानगरेषु वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति।
5. प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते।

**उत्तरम् :**

1. शकटीयानम् कीदृशं धूमं मुञ्चति?
2. उद्याने केषां कलरवं चेतः प्रसादयति?
3. पाषाणीसभ्यतायां के प्रस्तरतले पिष्टाः सन्ति?
4. कुत्र वाहनानाम् अनन्ताः पङ्क्तयः धावन्ति?
5. कस्याः सन्निधौ वास्तविकं सुखं विद्यते?

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत- $1/2 \times 4 = 2$**

I. निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।
अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्।।

**अन्वयः–** सा (1) .......... निजबुद्ध्या (2) .......... भयाद् विमुक्ता। लोके अन्यः (3) .......... अपि महतः (4) .......... मुच्यते।

II. शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता। $1/2 \times 4 = 2$
दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा।।

**अन्वयः–** (देहं मर्दनात् व्यायामेन) शरीरोपचयः, (1) .......... गात्राणां (2) .........., दीप्ताग्नित्वम्, (3) .........., स्थिरत्वम्, लाघवम् (4) .......... (च आयाति)।

| **मञ्जूषा** |
|---|
| बुद्धिमान्, भामिनी, भयात्, व्याघ्रस्य, अनालस्यम्, कान्तिः, मृजा, सुविभक्तता। |

**उत्तरम् :**

I **अन्वयः** (1) भामिनी, (2) व्याघ्रस्य, (3) बुद्धिमान्, (4) भयात्।

II **अन्वयः** (1) कान्तिः, (2) सुविभक्तता, (3) अनालस्यम् (4) मृजा।

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत–** $1 \times 4 = 4$

इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयंकरा।
व्याघ्रोऽपि सहसा नष्टः गलबद्धश्रृगालकः।।

**भावार्थः –** श्रृगालेन सहितं व्याघ्रं .......... बुद्धिमती यदा श्रृगालं तर्जयन्ती तं मारयितुं धाविता, तदा .......... व्याघ्रहन्त्रीं तां बुद्धिमतीं दृष्ट्वा .......... संलग्नश्रृगालयुक्तः व्याघ्रः ततः शीघ्रं पलायनं करोति। एवं प्रकारेण सा बुद्धिमती व्याघ्रजाद् भयात् पुनरपि .......... अभवत्।

| **मञ्जूषा–** भीषणां, मुक्ता, कण्ठे, दृष्ट्वा, |
|---|

**उत्तरम् :**

**भावार्थः –** श्रृगालेन सहितं व्याघ्रं **दृष्ट्वा** बुद्धिमती यदा श्रृगालं तर्जयन्ती तं मारयितुं धाविता, तदा **भीषणां** व्याघ्रहन्त्रीं तां बुद्धिमतीं दृष्ट्वा **कण्ठे** संलग्नश्रृगालयुक्तः व्याघ्रः ततः शीघ्रं पलायनं करोति। एवं प्रकारेण सा बुद्धिमती व्याघ्रजाद् भयात् पुनरपि **मुक्ता** अभवत्।

**17. अधोलिखित–कथांशं समुचित–क्रमेण लिखत–** $1/2 \times 8 = 4$

1. अयमेकस्तावद्विभज्य भुज्यताम्।
2. व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रः पलायितः।
3. गलबद्धश्रृगालकः व्याघ्रोऽपि सहसा नष्टः।
4. श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दृष्ट्वा बुद्धिमती जम्बुकमाक्षिपति।
5. मार्गे सा एकं व्याघ्रमागच्छन्तं दृष्ट्वा पुत्रौ चपेटया प्रहृत्य जगाद।
6. बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
7. बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।
8. एवं बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।

**उत्तरम् :**

1. बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।
2. मार्गे सा एकं व्याघ्रमागच्छन्तं दृष्ट्वा पुत्रौ चपेटया प्रहृत्य जगाद।
3. अयमेकस्तावद्विभज्य भुज्यताम्।
4. व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रः पलायितः।
5. श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दृष्ट्वा बुद्धिमती जम्बुकमाक्षिपति।
6. गलबद्धश्रृगालकः व्याघ्रोऽपि सहसा नष्टः।
7. एवं बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।
8. बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।

**18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत–** $1 \times 3 = 3$
**(केवलं प्रश्नत्रयम्)**

| **क** | **ख** |
|---|---|
| कुसुमावलिः | पिष्टीकुर्वत् |
| भृशम् | भयङ्करैः |
| पेषयद् | अत्यधिकम् |
| दुर्दान्तैः | पुष्पपंक्तिः |

**उत्तरम् :**

| | | |
|---|---|---|
| कुसुमावलिः | = | पुष्पपंक्तिः |
| भृशम् | = | अत्यधिकम् |
| पेषयद् | = | पिष्टीकुर्वत् |
| दुर्दान्तैः | = | भयङ्करैः |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत– (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. कविः ग्रामान्ते एकान्ते <u>कान्तारे</u> सञ्चरणं कर्त्तुम इच्छति।
(क) वने
(ख) गहने
(ग) जने
**उत्तरम् :** (क) वने

2. <u>अरयः</u> व्यायामिनं न अर्दयन्ति।
(क) सर्पः
(ख) शत्रवः
(ग) गरुडः
**उत्तरम् :** (ख) शत्रवः

3. लवकुशयोः एकमेव <u>प्रतिवचनम्</u> आसीत्।
(क) उत्तरम्
(ख) अध्यासितुम्
(ग) उपवेष्टुम्

**उत्तरम् :** (क) उत्तरम्

4. जनकेन <u>सुताय</u> शैशवे विद्याधनं दीयते।

(क) छात्राय

(ख) बालकाय

(ग) पुत्राय

**उत्तरम् :** (ग) पुत्राय

WWW.CBSE.ONLINE

Download unsolved version of this paper from
www.cbse.online

This sample paper has been released by website www.cbse.online for the benefits of the students. This paper has been prepared by subject expert with the consultation of many other expert and paper is fully based on the exam pattern for 2019-2020. Please note that website www.cbse.online is not affiliated to Central board of Secondary Education, Delhi in any manner. The aim of website is to provide free study material to the students.